[संस्कृतप्रियाः] सम्भाषणसंस्कृतम् -2019 - गुरुवासरवर्गस्य छात्रेभ्यः इमानि उत्तराणि

From: 'lakshmi mandadi' via Samskritam 2013 (samskritam-2013@googlegroups.com)
To: lakshmi_mandadi@yahoo.com
Cc: samskritam-2013@googlegroups.com
Date: Thursday, 2 July, 2020, 2:57 PM GMT-7

1. अकर्मकधातूनाम् अभिज्ञानं कथं भवति ?

लज्जा , सत्ता , स्थितिः , जागरणं , वृद्धिः , क्षयः , भयं , जीवितं , मरणं , शयनं , क्रीडा , रुचिः , दीप्तिः -

एतेषु अर्थेषु ये ये धातवः सन्ति , ते सर्वे **अकर्मकधातवः** एव ।

उदहरणार्थम् :

सत्ता - इत्यस्मिन् अर्थे :

अस् - धातुः (सत्तायाम् अर्थे) अकर्मकः - अस्ति

भू - धातुः (सत्तायाम् अर्थे) अकर्मकः - भवति

विद् - धातुः (सत्तायाम् अर्थे) अकर्मकः - विद्यते

वृत् - धातुः (सत्तायाम् अर्थे) अकर्मकः - वर्तते

अत्रोक्ताः सर्वे **धातवः अकर्मकाः** एव खलु ?

अकर्मकधातूनां संग्रहः
लज्जासत्तास्थितिजागरणं
वृद्धिक्षयभयजीवितमरणम्।
शयनक्रीडारुचिदीप्त्यर्थं
धातुगणं तमकर्मकमाहुः।।

---

2. श्लोकः


एक एव खगो मानी वने वसति चातकः ।
पिपासितो **म्रियते** वा **याचते** वा पुरन्दरम् ॥

---

3. एक एव - अत्र विसर्गसन्धिः अस्ति ।

पञ्चमं भाट्टसूत्रम् = अतः परस्य विसर्जनीयस्य आचि लोपः [आति इचि च]

एकः + एव = एक एव = विसर्गसन्धिः

अतः षष्ठ्यन्तं, परस्य षष्ठ्यन्तं, विसर्जनीयस्य षष्ठ्यन्तम्, आचि सप्तम्यन्तं, लोपः प्रथमान्तम् इति ।

आच् इत्युक्तौ **आत् इच् च** ।

सारांशः— विसर्गात् पूर्वम् अत् अस्ति चेत्, अपि च विसर्गस्य पुरतः आत् इच् वा अस्ति चेत्, विसर्गस्य लोपः भवति ।

---

4. खगो मानी - अत्र विसर्गसन्धिः अस्ति ।

खगः + मानी = खगो मानी

चतुर्थं भाट्टसूत्रम् = अतः परस्य विसर्जनीयस्य अति हशि च उत्वम् ।

अतः षष्ठ्यन्तं, परस्य षष्ठ्यन्तं,
विसर्जनीयस्य षष्ठ्यन्तम्,
अति सप्तम्यन्तं,
हशि सप्तम्यन्तम्,
उत्वम् प्रथमान्तम् इति ।

सारांशः— विसर्गात् पूर्वम् अत् अस्ति चेत्,
अपि च विसर्गस्य पुरतः अत् हश् वा अस्ति चेत्,
तर्हि विसर्गस्य स्थाने उकारादेशो भवति ।

हश्-वर्णो नाम खर्-भिन्नः हल्-वर्णः इति स्मर्तव्यम् ।

---

5. मानी - पुंलिङ्गपदम्

मानिनी - स्त्रीलिङ्गपदम्

मानी - **इनि** प्रत्ययान्तरूपम्

---

6. म्रियते

०६.०१३९ **मृ**

मृङ् प्राणत्यागे (to die)

तुदादिः आत्मनेपदी अकर्मकः अनिट्

तिङन्तरूपाणि | कृदन्तरूपाणि | प्रयोगाः New !

विशेषः » मृ-धातोः विषये 'म्रियतेर्लुङ्लिङोश्च' १।३।६१ इत्यनेन केवलं शित्-प्रत्यये परे तथा च लुङ् /आशीर्लिङ्-लकारयोः विषये आत्मनेपदम् भवति । अन्येषु लकारेषु (लिट्, लुट्, लृट्, लृङ् - एतेषु) परस्मैपदम् विधीयते ।

लट्लकारः (आत्मनेपदम्)		
म्रियते	म्रियेते	म्रियन्ते
म्रियसे	म्रियेथे	म्रियध्वे
म्रिये	म्रियावहे	म्रियामहे

---

7. बिभेति

०३.०००२ **भी**

जिभी भये (to fear, to be afraid of, to be anxious about)

जुहोत्यादिः परस्मैपदी अकर्मकः अनिट्

तिङन्तरूपाणि | कृदन्तरूपाणि | प्रयोगाः New !

लट्लकारः (परस्मैपदम्)		
बिभेति	बिभितः , बिभीतः	बिभ्यति
बिभेषि	बिभिथः , बिभीथः	बिभिथ , बिभीथ
बिभेमि	बिभिवः , बिभीवः	बिभिमः , बिभीमः

---

8. सकर्मकः - इत्यस्मिन् पदे कः समासः अस्ति ?

सकुटुम्बः/सहकुटुम्बः इत्यस्मिन् पदे कः समासः वर्तते ?

सकुटुम्बः / सहकुटुम्बः - विकल्पेन रूपद्वयम् अपि अस्ति ।

कुटुम्बेन सह वर्तते = विग्रहवाक्यम्

अस्मिन् पदे **'सहपूर्वपदबहुव्रीहिसमासः'** अस्ति ।

तेन सहेति तुल्ययोगे (२-२-२८) इति सूत्रेण अत्र **सहपूर्वपदबहुव्रीहिसमासः** भवति ।



४.२.५. सहपूर्वपदः

८'सह' इत्येतत् तृतीयान्तेन समस्यते ।

पुत्रेण सह वर्तते इति = सपुत्रः/सहपुत्रः ९

कुटुम्बेन सह वर्तते इति = सकुटुम्बः/सहकुटुम्बः

कर्मणा सह वर्तते इति = सकर्मकः

---

9. ज्ञा (अवबोधने) धातोः लोट् लकारे आत्मनेपदिरूपाणि अत्र दत्तानि ।

लोट्लकारः (आत्मनेपदम्)		
जानीताम्	जानाताम्	जानताम्
जानीष्व	जानाथाम्	जानीध्वम्
जानै	जानावहै	जानामहै

---

10. अवलोकते

अव (उपसर्गः) + लोकते



लट्लकारः (आत्मनेपदम्)		
लोकते	लोकेते	लोकन्ते
लोकसे	लोकेथे	लोकध्वे
लोके	लोकावहे	लोकामहे

---

11. ४९ - अस्याः संख्यायाः उच्चारणं कथं भवेत् ?

एकोनपञ्चाशत् अथवा **ऊनपञ्चाशत्** अथवा **एकान्नपञ्चाशत्** अथवा **नवचत्वारिंशत्**

एकोनपञ्चाशत् (एक + ऊन = एकोन)

एकान्नपञ्चाशत् (एकात् + न = एकान्न)

अस्य शब्दस्य (अस्याः सङ्ख्यायाः) रूपाणि **त्रिषु लिङ्गेषु** कथं वक्तव्यानि ?

पिंसि = नवचत्वारिंशः

स्त्रियाम् = नवचत्वारिंशी

नमुंसि = नवचत्वारिंशम्

---

12. कृ - धातुः (डुकृञ् करणे)

कृ धातुः = उभयपदी

कृ धातोः (आत्मनेपदिरूपाणि) लोट् लकाररूपाणि

लोट्लकारः (आत्मनेपदम्)		
कुरुताम्	कुर्वाताम्	कुर्वताम्
कुरुष्व	कुर्वाथाम्	कुरुध्वम्
करवै	करवावहै	करवामहै

---

13. संस्कृतभाषायां केवलं पञ्चसु स्थलेषु द्वित्वं भवति ।

लिटि, सनि, चङि, यङि, श्लौ ।

जुहोत्यादिगणे 'द्वित्वम्' भवति ।

लिट् लकारे अपि 'द्वित्वं' भवति ।

वच् धातोः लिट् लकार रूपाणि ।

लिट्लकारः (परस्मैपदम्)		
उवाच	ऊचतुः	ऊचुः
उवचिथ	ऊचथुः	ऊच
उवच , उवाच	ऊचिव	ऊचिम

---

14. सन् - प्रत्ययान्तरूपाणि - 1

पिपासा , बुभुक्षा , जिज्ञासा - इत्यादीनि सन्नन्तपदानि

- इच्छार्थकः सन्-प्रत्ययः
- सर्वेभ्यः धातुभ्यः भवति
- सन्नन्ताः धातवः भवन्ति – तिङन्तरूपाणि, कृदन्तरूपाणि च
- पिपठिषति, पिपठिषा, पिपठिषुः

---

15. सन् - प्रत्ययान्तरूपाणि - 2

- पठितुम् इच्छति – पिपठिषति
- "पिपठिष" इति सन्नन्त-धातोः लट्-लकारः (तिङन्तः)
- पठितुम् इच्छा – पिपठिषा
- "पिपठिष" इति सन्नन्त-धातोः अ-प्रत्ययरूपम् (कृदन्तः)
- पठितुम् इच्छुः – पिपठिषुः
- "पिपठिष" इति सन्नन्त-धातोः उ-प्रत्ययरूपम् (कृदन्तः)

---

16. सुषुप्तिः - इति कीदृशं पदम् ?

सुषुप्तिः = स्त्रीलिङ्गपदम्

सु (उपसर्गः) + स्वप् (धातुः) + क्तिन् (प्रत्ययः) = प्रगाढनिद्रा

०२.००६३ **स्वप्**

ञिष्वपँ शये (to sleep)

अदादिः परस्मैपदी अकर्मकः अनिट् रुदादिः

तिङन्तरूपाणि | कृदन्तरूपाणि | प्रयोगाः New !

लट्लकारः (परस्मैपदम्)		
स्वपिति	स्वपितः	स्वपन्ति
स्वपिषि	स्वपिथः	स्वपिथ
स्वपिमि	स्वपिवः	स्वपिमः

---

17. डुदाञ् दाने (जुहोत्यादिः , उभयपदी , सकर्मकः)

दा धातोः लट् रूपाणि



०३.००१० **दा**

डुदाञ् दाने (to give, to provide, to donate, to handover)

जुहोत्यादिः उभयपदी सकर्मकः अनिट्

तिङन्तरूपाणि | कृदन्तरूपाणि | प्रयोगाः New !

लट्लकारः (परस्मैपदम्)		
ददाति	दत्तः	ददति
ददासि	दत्थः	दत्थ
ददामि	दद्वः	दद्मः

लट्लकारः (आत्मनेपदम्)		
दत्ते	ददाते	ददते
दत्से	ददाथे	दद्ध्वे
ददे	दद्वहे	दद्महे

---

18. दुग्धम् ?

दुह् (धातुः) + क्त (प्रत्ययः) = दुग्ध

दुग्ध = प्रातिपदिकम्

दुग्धं , दुग्धा , दुग्धः - त्रिषुलिङ्गेषु रूपाणि



०२.०००४ **दुह्**

दुहँ प्रपूरणे (to milk, to extract)

अदादिः उभयपदी सकर्मकः अनिट्

तिङन्तरूपाणि | कृदन्तरूपाणि | प्रयोगाः New !

लट्लकारः (परस्मैपदम्)		
दोग्धि	दुग्धः	दुहन्ति
धोक्षि	दुग्धः	दुग्ध
दोह्मि	दुह्वः	दुह्मः

लट्लकारः (आत्मनेपदम्)		
दुग्धे	दुहाते	दुहते
धुक्षे	दुहाथे	धुग्ध्वे
दुहे	दुह्वहे	दुह्महे

---

19. पा - धातोः णिजन्तरूपम् = पाययति

शाच्छासाह्वाव्यावेपां युक् (७.३.३७) इति सूत्रेण

शो, छो, सो, ह्वे, व्ये, वे, पै - इत्येषां धातूनां युक् आगमः भवति णिचि परे।

पुगागमस्य अपवादः।

पा पाने →

पा + युक् + णिच् → पायि (नूतनधातुः)

पायि → पाययति

---

20. अहन् - शब्दस्य रूपाणि

७४.००२ **अहन्**

नकारान्तः नपुंसकलिङ्गः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अहः	अहनी / अह्नी	अहानि
द्वितीया	अहः	अहनी / अह्नी	अहानि
तृतीया	अह्ना	अहोभ्याम्	अहोभिः
चतुर्थी	अह्ने	अहोभ्याम्	अहोभ्यः
पञ्चमी	अह्नः	अहोभ्याम्	अहोभ्यः
षष्ठी	अह्नः	अह्नोः	अह्नाम्
सप्तमी	अहनि / अह्नि	अह्नोः	अहःसु / अहस्सु
सम्बोधनम्	हे अहः / अहन्	हे अहनी / अह्नी	हे अहानि

---

21. सन्ततिः - तस्य रूपाणि मतिः शब्दवत् भवन्ति ।

इ,उ,ऋकारान्तानां स्त्रीलिङ्गरूपाणि

इकारान्तः (मति)

	एक.	द्वि.	बहु.
प्र.	मतिः	मती	मतयः
द्विती.	मतिम्	मती	मतीः
तृ.	मत्या	मतिभ्याम्	मतिभिः
च.	मत्यै/मतये	मतिभ्याम्	मतिभ्यः
प.	मत्याः/मतेः	मतिभ्याम्	मतिभ्यः
ष.	मत्याः/मतेः	मत्योः	मतीनाम्
स.	मत्याम्/मतौ	मत्योः	मतिषु
सम्बो.	मते !	मती !	मतयः !

---

22. लभते

०१.११३० **लभ्**

डुलभँष् प्राप्तौ (to get, to obtain, to take, to have, to find)

भ्वादिः आत्मनेपदी सकर्मकः अनिट्

तिङन्तरूपाणि | कृदन्तरूपाणि | प्रयोगाः New !

लट्लकारः (आत्मनेपदम्)

लभते	लभेते	लभन्ते
लभसे	लभेथे	लभध्वे
लभे	लभावहे	लभामहे

--

You received this message because you are subscribed to the Google Groups "Samskritam 2013" group.
To unsubscribe from this group and stop receiving emails from it, send an email to samskritam-2013+unsubscribe@googlegroups.com.
To view this discussion on the web visit https://groups.google.com/d/msgid/samskritam-2013/1034666902.1789710.1593727011389%40mail.yahoo.com.